# Shri Rajnistutih

# શ્રીરાજ્ઞીસ્તુતિઃ

## Document Information

Text title : Rajni StutiH

File name : rAjnIstutiH.itx

Category : devii, devI, otherforms, stuti, aShTaka

Location : doc_devii

Transliterated by : Harmander Singh

Proofread by : Harmander Singh

Latest update : August 13, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 13, 2024

*sanskritdocuments.org*

# શ્રીરાજ્ઞીસ્તુતિઃ

ૐ સંસારસાગરમહં તરિતું સુનૌકાં
રાજ્ઞીં નમામિ શિરસા શિવસુન્દરીં ત્વામ્ ।
સર્વેશ્વરીં સકલલોકસુખપ્રદાત્રીં
ત્વામેવ દેવિ સતતં શરણં પ્રપદ્યે ॥ ૧॥

માતઃ પયોધરયુગં પિબતુ ત્વદીયં
નાગાનનર્તુમુખવત્સલપુત્રયુગ્મમ્ ।
નિર્ણેજનામ્બુન ઇહ સ્પૃહયામ્યહં તુ
ત્વત્પાદપદ્મયુગલસ્ય ભવાગ્નિશાન્ત્યૈ ॥ ૨॥

માતસ્ત્વદીયપરિતોષવિશેષલબ્ધે
છત્રે પ્રહૃષ્યતુ સદા ભગવાન્સુરેન્દ્રઃ ।
પીયૂષવર્ષણકરાત્તવ દેવિ પાદ-
ચ્છત્રાદ્વિના કિમપિ રાજ્ઞિ ન નામ યાચે ॥ ૩॥

મોહાટવીવિકટસઙ્કટપીડિતોઽહં
રાજ્ઞી પ્રપન્નપરમાર્તિહરા ત્વમેકા ।
જાજ્વલ્યતેઽમ્બ હૃદયાર્તિકરો મમાન્તઃ
પાપાગ્નિરેશિ શમયૈનમમાસ્વરૂપે ॥ ૪॥

આરારટીમિ કરુણં ભવતાપતપ્તઃ
પ્રોલ્લાલપીમિ પતિતો ભવદુઃખસિન્ધૌ ।
મોમોર્મિ રાજ્ઞિ લુઠિતો ભવસર્પદષ્ટ-
સ્ત્વામન્તરેણ શરણં મમ કઃ શરણ્યે ॥ ૫॥

રાજ્ઞિ પ્રપન્નવરદે સુકૃતાદપર્ણાં
ત્વામાશ્રિતોઽસ્મિ સુચિરાત્તુ મહદ્વિચિત્રમ્ ।
કિં નાસ્મિ ભૈરવિ ઋણૈસ્ત્રિવિધૈર્વિમુક્તઃ
પાશૈરિવોત્કટવિષાક્તભુજઙ્ગમાનામ્ ॥ ૬॥

રાજ્ઞિ પ્રસીદ નતસૌખ્યકરે મૃડાનિ
રુદ્રાણિ રોગહરણે ચતુરે પ્રસીદ ।
શર્વાણિ સર્વજનપાપહરે પ્રસીદ
ગૌરિ પ્રસીદ ગુણગૌરિ શિવે પ્રસીદ ॥ ૭॥

કલ્યાણિ રાજ્ઞિ જગદીશ્વરિ વિશ્વમાત-
સ્ત્વામન્તરેણ નહિ દેવિ સુખં જનસ્ય ।
પુત્રસ્ય દુઃખહરણે સતતોદ્યતા દ્રાક્
માતૈવ હિ સ્નુતકુચા નુ ભવત્યવશ્યમ્ ॥ ૮॥

રાજ્ઞાષ્ટકમિદં પુણ્યં યઃ પઠેદ્ધર્ષપૂરિતઃ ।
સોઽત્ર દ્રાક્ પ્રાપ્નુયાત્કામાન્પરલોકે ચ સ્વર્ગતિમ્ ॥ ૯॥

ઇતિ શ્રીરાજ્ઞીસ્તુતિઃ સમ્પૂર્ણા ।

Encoded and proofread by Harmander Singh

*Shri Rajnistutih*

pdf was typeset on August 13, 2024

Please send corrections to *sanskrit@cheerful.com*